# Ashtamahishi Prarthana Shatakam

# અષ્ટમહિષીપ્રાર્થનાશતકમ્

## Document Information

Text title : Ashtamahishi Prarthana Shatakam

File name : aShTamahiShIprArthanAshatakam.itx

Category : devii, shataka

Location : doc_devii

Author : rAmAnujArya

Proofread by : Rajesh Thyagarajan

Description/comments : From Stotrasamuchchaya 2, Edited by Pandit K. Parameshwara Aithal

Latest update : May 10, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2023

*sanskritdocuments.org*

# અષ્ટમહિષીપ્રાર્થનાશતકમ્

શ્રીવેઙ્કટેશદારા ધીરા ક્ષેમસ્ય મે સદાધારા ।
કરુણાવનસઞ્ચારા તારાસઙ્કાશરત્નમયહારા ॥ ૧॥

નારાયણવનજનિતા નારી નારાયણસ્ય મે માતા ।
પારાયણાર્હચરિતા ત્રાતા પીતામ્બરેણ ચાયાતા ॥ ૨॥

માતર્ભૂમેર્યાતઃ પ્રાતઃ સાયં નમામિ તવ પોતઃ ।
નિહિતં તવ પદિ ચેતઃ કાતઃ પરમવિતુમસ્તિ માં માતઃ ॥ ૩॥

લસનપ્રસૂનવેષે પ્રસુ મે વસુ મેઽદ્ય દેહિ હરિયોષે ।
કુસુમૈરાભ્યાં ભાષે પ્રાસૂયામાં મનઃ સ્વસન્તોષે ॥ ૪॥

કાઞ્ચીલાઞ્છિતદેવીં કાઞ્ચનદેવીં ચ વરદવશનીવીમ્ ।
વન્દે મહતીં દેવીં ચન્દ્રાં દન્તાવલાદ્રિસુખપૃથિવીમ્ ॥ ૫॥

માધવસાપ્તપદીને મામવ ગતિનિર્જિતેભવતિ યૂને ।
નવનવભવનવિધાને ભવ ભવ નિત્યં મદીયહૃત્સ્થાને ॥ ૬॥

સજ્જનરક્ષણધન્યાં માન્યાં મન્યે સરિત્પતેઃ કન્યામ્ ।
મેદિન્યાં કામિન્યાં ગુણ્યાં ગણયેય ભૂરિ સુધરિણ્યામ્ ॥ ૭॥

કરુણામધુમયચરણામરુણામરુણાન્વવાયપરિચરણામ્ ।
કરુણાવિવૃતાભરણાં સુગુણાભરણાં ભજામિ હરિશરણામ્ ॥ ૮॥

મજ્જનયિત્રીં ધાત્રીં સજ્જનપાત્રીં સુદીર્ઘઝષનેત્રીમ્ ।
ભેજે પ્રસૂનગાત્રીં દાત્રીં પાત્રીં નતસ્ય હરિમૈત્રીમ્ ॥ ૯॥

લક્ષ્મીમક્ષયસદયાં સાર્દ્રસુહૃદયાં સમુદ્રહિતતનયામ્ ।
આશ્રિતરક્ષણવિજયામાજાનીયાસ્યહૃદયશુભનિલયામ્ ॥ ૧૦॥

અમ્બાં કચલોલમ્બાં કમ્બુગ્રીવાં પ્રસન્નમુખબિમ્બામ્ ।
પદગતિજિતકાદમ્બામમ્બુજવલ્લીં નમામિ લોકામ્બામ્ ॥ ૧૧॥

સીતાસ્માકં માતા સાકેતાધીશ્વરીષ્ટિભૂજાતા ।
પીતામ્બરપરિણીતા ત્રાતા પૂતાખિલેભ્ય ઇતિ ગીતા ॥ ૧૨॥

હરિપરિચર્યાપ્રીતા ભૂતત્રાતાર્ચિતેતિ કવિગીતા ।
તાતોપમિતા માતા ત્રાતા શાતાઙ્ગિનીહ માં સીતા ॥ ૧૩॥

સેવિતદનુજત્રિજટા પાલિતનિશ્રીકગર્ગરત્રિજટા ।
સ્વવશીકૃનપીતપટા પ્રતિભટહરિણાય ચાસ્તુ હરિવેલા ॥ ૧૪॥

ભાષાવિનુતવિશેષા ભાષાપતિશેષવિનુતપરિભાષા ।
ભૂષાભિલષિતભૂષા ભૂષા ભૂષાયમાનવપુષાસ્તુ ॥ ૧૫॥

ઘટિકાદ્રિકુશલપેટી સજ્જનસન્ત્રાણસક્તપરિપાટી ।
વિલસિતકાઞ્ચનશાટી પાતુ રતિભીષ્ટિદીનજનકોટીઃ ॥ ૧૬॥

વૈદેહિ દેહિ વિત્તં શ્રીદે પાદે હ લગ્નમથ ચિત્તમ્ ।
કુર્યામાર્યાવૃત્તં ધાર્યં નિત્યં કરોમિ તવ વૃત્તમ્ ॥ ૧૭॥

કરલલિતકમલયુગલા કરિકરચામરસુજાતમૃદ્વનિલા ।
ત્વરમભયં મે કમલા કુરુતાજ્જનની કરેણ હરિમહિલા ॥ ૧૮॥

નામાચલલક્ષ્મિ રમે માયૈવાચલ ....સ્વલોભમયે ।
આશ્રિતરક્ષાકામે સ્વાત્મજયુગલં ચ દેહિ હરિમામે ॥ ૧૯॥

ઉપમાનામુપમૈષા ભૂષા ભૂષાસુ ભાસુ મઞ્જૂષા ।
સ્વવશીકૃતાદિપુરુષા સવિશેષા પાતુમસ્તુ હરિયોષા ॥ ૨૦॥

અબલાનાં પ્રબલાસૌ સ્ત્રીષુ શ્રીરુત્તમા ચ વામાનામ્ ।
રામાભિરામરામા શાન્તા કાન્તાસુ કોપનાસ્વેષા ॥ ૨૧॥

સર્વદસર્વદ ....શ્રીઃ શ્રીદા શ્રીદાર્ચિતાબ્જમયપાદા ।
કૃતજીવેશ્વરભેદા નિર્ભેદાનન્દબોધનાનન્દા ॥ ૨૨॥

આત્મોપમાનરહિતા સહિતા શ્રીવત્સકૌસ્તુભાભરણૈઃ ।
હરિમધ્યા હરિવત્સા હરિપીઠાલઙ્કૃતાસ્તુ હરિવાણી ॥ ૨૩॥

અસ્માકં યા માતા સા ભવતિ પિતામહસ્ય ચિત્રં તત્ ।
ગઙ્ગાતનયોપાસ્યા ગઙ્ગાજનની હિ ગીતગાઙ્ગેયા ॥ ૨૪॥

હરિવત્સપ્રાસાદા હરિવત્સપ્રસાદબહુલસમ્મોદા !
કરિવત્સાઞ્ચિતગમના કરિવત્સાઞ્ચિતપદાસ્તુ મે વરદા ॥ ૨૫॥

શિરસાદૃતનારતતા ચરણાદૃતનારદાદિમુનિજનતા ।
વચસાદૃતશુકકલિતા પદપાલિત ....શુકાસ્તુ મે માતા ॥ ૨૬॥

ગન્ધર્વપૂર્વલલિતા ગન્ધર્વૈઃ કિન્નરૈશ્ચ બહુવિનુતા ।
ગન્ધર્વવક્ત્રવિનુતા ગન્ધદ્વારા ચ પાતુ માં માતા ॥ ૨૭॥

શ્રીશુકનગરવિશેષે નાશિતદારિદ્ર્યદુઃખબહુદોષે ।
શ્રીશ્રીનિવાસભૂષે સ્વાશાં મે પૂરયસ્વ હરિયોષે ॥ ૨૮॥

દશશતકમલવિકાસે દિશિ દિશિ માતર્ધનાનિ દાતાસે ।
મમ હૃદયગૃહનિવાસે શિથિલા ભૂય .... મદ્વાસે ॥ ૨૯॥

વિજ્ઞાનાખ્યો મનુતે પૂર્વો હરિરેવ ચેતિ ભૂદેવી ।
શ્રિયમથ વિદ્વાનાર્યઃ સાદરમાર્યાં પ્રવતિ પૂર્વે ત્વામ્ ॥ ૩૦॥

પૂર્ણિમયા ચામાયાઃ ભાસશ્ચિત્રં તિથિદ્વયં ત્વયિ વૈ ।
શિરસઃ પરતો દર્શઃ તત્પરતસ્તે સુપૂર્ણિમેન્દ્વાસ્યે ॥ ૩૧॥

ચન્દ્રાદમૃતં પિપ્સુઃ રાહુસ્તં ચાક્રમચ્ચ ચાહસ્યે ।
મુખદૃગ્ભૂષાચન્દ્રઃ બદ્ધ્વા તં ચાપહન્તિ ગિરિમધ્યે ॥ ૩૨॥

નયનં સુદર્શનં તે શાઙ્ખઃ કણ્ઠઃ ફણી ચ તવ વેણી ।
પરમં પદયુગલં તે યાને ચરણે ચ પક્ષિરાજોઽસ્તિ ॥ ૩૩॥

નયનં સુભરદ્વાજો ધમ્મિલ્લો નારદશ્ચ તવ માતઃ ।
શુકવદમોદાશીતે નાનારત્ને મરીચિરપિ દેવી ॥ ૩૪॥

અવને શક્તિશ્ચાસ્તે વક્ષોજો કુમ્ભસમ્ભવો માતઃ ।
વલ્મીકિનિભો નાભિઃ વ્યાસોઽર્ભક એવ નિત્યમા સ્થાને ॥ ૩૫॥

તદિદં ચિત્રં માતઃ કાઞ્ચ્યાન્તસ્તેત્ય હો બિલં ચેતિ ।
નેદં પુત્રકચિત્રં હરિરુભયત્રાપિ તત્ર સર્વે સ્યાત્ ॥ ૩૬॥

કાઞ્ચીકુચકૈલાસો માતઃ શૂન્યં તવાન્તરતિહાસઃ ।
કૈલાસાવપિ કાઞ્ચીં ન વિશતિ ચેત્તં ચ તેઽન્તરધિકોઽયમ્ ॥ ૩૭॥

હરિકરકમલવિલાસે તવ કુચસૂર્યો હિ દેવિ સુચકાસે ।
હરિનયનપદ્મભાસે તવ મુખચન્દ્રં પ્રકાશયત્યાસે ॥ ૩૮॥

ડોલીકૃતવનમાલા માલીકૃતવિધિવશાણ્ડમણિયુગલા ।

યુગલીકૃતહરિલીલા બાલા સિન્ધોઃ પ્રભાતુ કરકમલા ॥ ૩૯॥

પાદગ્રહણાત્ તાતોઽમોદત ચાસ્માકમમ્બ બહુધામ્નઃ ।
ગૃહ્ણામ્યઙ્ઘ્રી પૂર્ણં તૂર્ણં માં મોદયસ્વ હરિગૃહિણિ ॥ ૪૦॥

કૃષ્ણઃ કચમારોઽધાન્નયતે મીનૌ તવાદ્ય ભાસેતે ।
હરિરમ્બ મધ્યમસ્તે દેવોઽઙ્ગી સમ્બભૂવ ચાઙ્ગાનિ ॥ ૪૧॥

તવ ચરણમીક્ષ્ય તારા અવદધુરનિશં સરોરુહાકારે ।
અવલોકય નયનમિન્દુઃ તરણિં પર્યભવચ્ચ કુમુદાક્ષિ ॥ ૪૨॥

નીચૈર્વાસવિનિદાં મોક્તું દિઙ્નાગનાગકુાવદ્ય ।
નાભેરુચ્ચૈર્માતઃ ભાતઃ કુચયોશ્ચ રોમરાજ્યાં તે ॥ ૪૩॥

ત્વામાશ્રિત્ય વિશેષઃ રોમ્ણા રાજ્યાં વિભાતિ સવિશેષઃ ।
ઇતિ વાસુકિરપિ ચાન્યો વેણીં શિશ્રાય નાન્યવર્ધિષ્ણુઃ ॥ ૪૪॥

આકાશે કાઞ્ચૈકા તસ્યાં હરિરમ્બ યોગિસન્દૃશ્યઃ ।
માતર્ધત્તે સ હરિઃ ગિરિમહિમિભમિન્દુમર્કમભ્રાદીન્ ॥ ૪૫॥

કુચયુગમસ્તકમઞ્ચે દૃષ્ટ્વા રોષાતુરોઽપિ હર્યક્ષઃ ।
નિજગણનામતિહીનો સન્નિધિમાહાત્મ્યતો હિતેઽભૂત્ સઃ ॥ ૪૬॥

એકત્ર ચ તરણીન્દૂ ભૂતે નામા તથાપિ હરિગૃહિણિ ।
એકત્ર રાહુચન્દ્રાવુપરાગો નૈવ ચાનુરાગોઽભૂત્ ॥ ૪૭॥

કમલે ચન્દ્રોત્પત્તિઃ ચન્દ્રાદુચ્ચૈશ્ચ ભાતિ ચન્દ્રોઽન્યઃ ।
ચન્દ્રદ્વયભીતઃ સન્ રાહુર્નીચૈઃ પ્રયાતિ પશ્ચાન્મે ॥ ૪૮॥

તવ ભુજગવિહગરાજૌ શયને યાને સદા પ્રથાભાજૌ ।
ભવતાં સ તયોર્માતઃ શેષો વેષે વિશેષભાષાસીત્ ॥ ૪૯॥

ધન્યં કુરુ માં માન્યે ધન્યેવાસે સમુદ્રહિતકન્યે ।
માન્યે લોકવરેણ્યે ધન્યાય ત્વાં ધિનાયકાં મન્યે ॥ ૫૦॥

હરિનખભીતૌ કરિણાવન્તર્ધ્યાયેવ કઞ્ચુકે ત્રાસિ ।
જનનીવૈરિરિરક્ષા પત્યા ઘૃણયા બભૂવ કિં પદ્મે ॥ ૫૧॥

શિવપદયુગલાચ્છ્રેષ્ઠં વિધિપદદશકં ચ માતરાલેષુ ।
બહુધનદપુરાણ્યન્યે વિષ્ણોઃ પદમેકમેવ પતિવત્તે ॥ ૫૨॥

ઉપનયનં તવ ભક્તિઃ ઉપદેષ્ટા તવ પતિશ્ચ મે માતઃ ।
ઉપદિષ્ટં નામ ચ તે ભવતિ સુભિક્ષાં પ્રદેહિ વૈદેહિ ॥ ૫૩॥

તવ ભક્ત્યા મન્તૂક્તિઃ ભવતુ ચ માતસ્ત્વયૈવ કિલ ભુક્તિઃ ।
ગેહે મુખ્યા ગૃહિણી વિખ્યાતિશ્ચાસ્ય એવ ગૃહમુખ્યઃ ॥ ૫૪॥

માતઃ સાગરકન્યે તવ નનુ વક્ત્રં સુધાંશુરિતિ મન્યે ।
સત્યસ્ત્વેષસ્તર્કઃ નો ચેત્ કા સ્યાત્ વિધાવલોકેચ્છા ॥ ૫૫॥

તવ સન્નિધિમાહાત્મ્યાદ્વેષ્યો ન ત્વિષ્ટ એવ તે દેવિ ।
નયનાબ્જે મુખચન્દ્રે સિંહાદુચ્ચૈઃ પ્રભાત ઇવ મસ્તૌ ॥ ૫૬॥

માતસ્તવ માહાત્મ્યાદુચ્ચૈર્નીચૈશ્ચ ભાસમાનેભૌ ।
વિક્રાન્તૌ તૌ દૃષ્ટ્વા મૃગપતિમૃગ્યઃ સ એવ મૂઢોઽભૂત્ ॥ ૫૭॥

કાન્તસ્તે પરમાત્માનન્તસ્તલ્પસ્ત્રયીમયો યાનમ્ ।
અમરા નિત્યા ભૃત્યાઃ સત્યં પુત્રોઽસ્મિ યવનિકા માયા ॥ ૫૮॥

જક્ષત્ ક્રીડન્ શ્રુત્યા રક્ષિતુમેવામ્બ રહસિ કાન્તેન ।
જિત્વા પુરુષં સ્વવશં કૃત્વા નસ્તેન પાલયસિ ચામ્બ ॥ ૫૯॥

સપદિ જટાયોર્મોક્ષઃ ત્વત્તઃ પત્યુઃ સુકન્ધરે પક્ષઃ ।
સા માપિતરિ કટાક્ષઃ ત્વત્તો ભર્તા બભૂવ બહુદક્ષઃ ॥ ૬૦॥

વીરઃ કિલ તવ ભર્તા વિશ્વસ્મિન્ યત્ર યત્ર યાતાસે ।
વારઃ કિલ તવ પાતા ચિન્તા નારાયણે હિ કિમુ ન સ્યાત્ ॥ ૬૧॥

શ્યામા વા હરિણી ત્વં હ્યચલાતનયાપિ ચઞ્ચલાસિ ત્વમ્ ।
જનની મારસ્ય સ્યાઃ સુકુમારેભ્યશ્ચ નૌમિ માતસ્ત્વામ્ ॥ ૬૨॥

કવિજનનુતચરણા વા ગુરુજનનુતપાદુકૈવ મે માતઃ ।
પુણ્યજનૈર્નૃતચરિતા પુણ્યજનધ્વંસિનીહ ભૂર્માતઃ ॥ ૬૩॥

અલકાલઙ્કૃતવદના હ્યલકેશાલઙ્કૃતાબ્જમૃદુચરણા
પુલકાઙ્કિતસંહનના ફલકાલં નિત્યમેવ કુરુતાં મે ॥ ૬૪॥

શતધૃતિશતમતિવિનુતે શતમખમુખવિનુતલલિતબહુવસતે ।
અતુલિતશતકૃતિફલિતે ગતિરિહ ભવતીતિ મે મનો મનુતે ॥ ૬૫॥

શ્રીશૈલજઘનભાગા શ્રીરેફાલઙ્કૃતોત્તમાઙ્ગા હિ ।
અસ્તાચલમધ્યસ્થા ચક્ષોઃ સૌદર્શનાસ્તુ માં પાતુમ્ ॥ ૬૬॥

હરિવત્સેચ્છા વા સ્યાત્ કરિવત્સેચ્છેતિ દેવિ કવિગીતે ।
હરિવત્સેચ્છા વા સ્યાત્ માં કરિવરદો યથા તથા પાહિ ॥ ૬૭॥

રિપુશરપીડાં ભર્તુઃ વારિતુમેવાસ ઉરસિ તત્પૂર્વા ।
મમ પુત્રસ્ય હિ મહિતે પૂર્વસ્થા વારયામ્બ વર .... ॥ ૬૮॥

એકસ્યાં વ્યક્તૌ તે બહુવચનં નિત્યપુંસ્ત્વમાસાતે ।
સ્વાતન્ત્ર્યં બહુતત્ત્વે કિં ન સ્યાન્નનુ ન યુજ્યતે હરિદારાઃ ॥ ૬૯॥

કો વા કા વા પુરતઃ ન વદતિ તવ નામ ન સ્મરત્યમ્બ ।
સર્વત્ર ચ ભવદીયં શિરસા નતિરસ્તિ કુત્ર વા દેવિ ॥ ૭૦॥

ઇભ્યં સભ્યં કુરુ મામદ્ભિઃ પ્રક્ષાલયામિ તવ પાદૌ ।
લભ્યં કુરુ મે સૌખ્યં વિખ્યાતે દીનપોષણે દેવિ ॥ ૭૧॥

પૂર્વં વિત્તં દત્ત્વા પૂજાં તેનૈવ કારયસ્વામ્બ ।
ધનસુતહિતભૂલાભં દત્ત્વૈવાગ્રે વિધેહિ તવ ભક્તમ્ ॥ ૭૨॥

તવ ચરિતં મમ વિહિતં સુકૃતાલ્લબ્ધં હિ માતરાઢ્યાસિ ।
મૂઢં શ્રીદં કુરુ માં બાઢં કરવાણિ તેઽદ્ય પરિચર્યામ્ ॥ ૭૩॥

વિધિના મમૈવ સિદ્ધિઃ યદિ તે કૃપયા કિમસ્તિ મે માતઃ ।
તવ વા તવ પત્યુર્વા સ્વાતન્ત્ર્યેણૈકમેકમૈશ્વર્યાત્ ॥ ૭૪॥

પૃથુકા દત્તકુચેલાઃ રુચ્યાઃ કે તે ચ પત્યુરપિ ચાસ્યાઃ ।
તસ્માદિવ મત્તસ્ત્વં કિં વા નાભ્યવજહશ્ચ માતસ્ત્વમ્ ॥ ૭૫॥

આરાદ્ધાસિ ચ યેન પ્રથમઃ પૈતામહશ્ચ મુનિરાટ્ સઃ ।
તં ભારદ્વાજં વા બહુમાનેનાવલોક્ય માં પાહિ ॥ ૭૬॥

પાપાદિવધ્યવિષયે કરુણા કાર્યા નુ તેઽતિમૃદુવચનમ્ ।
ઊચિથ મારુતયે ત્વં વ્યસ્માર્ષીઃ કિં તદુક્તમધિકં મે ॥ ૭૭॥

પ્રત્યક્ષં કાર્યં મે દાતું શક્નોષિ ન યદિ મે માતઃ ।
મોક્ષં વા દાતા ચેત્ કરુણાજનિતા તવેતિ મન્વીય ॥ ૭૮॥

નાર્થીતુમપિ શક્નોમિ સ્મર્તું સ્તોતું ચ નાહાણ્ ઇહ ભવતીમ્ ।
પૂર્ણાં ભુક્તિં શક્તિં દત્ત્વાસક્તિં ચ દેહિ પદભક્તિમ્ ॥ ૭૯॥

નિદ્રાલુર્જનકો મે ગ્રહયાલુર્મયિ સદા સ્વપતયાલુઃ ।

સ્પૃહયાલુઃ શ્રદ્ધાલુઃ મદ્રક્ષાયૈ સદાપિ ભવ માતઃ ॥ ૮૦॥

ધ્યાયેમહિ મહિયાતઃ યાતઃ પૂર્વં પરં ચ જનનીં ત્વામ્ ।
પૂયેમહિ વયમધુના ગેયેડમેયે ત્વદીયભજનેન ॥ ૮૧॥

દિત્સાદિત્સાકુત્સૈઃ કુત્સિતભેરૈઃ કુમારજનનીભિઃ ।
ઉત્સવહીનૈઃ કિં વા ચોત્સાહય મેડદ્ય કિં ચાન્યૈઃ ॥ ૮૨॥

પ્રત્યક્ષમાત્રવાર્તે ચાર્વાકે મધ્યગોદ્યદાસ્તિક્યમ્ ।
ત્વમપિ ચ ન પ્રત્યક્ષઃ વક્તિ હરિસ્ત્વયિ તથા હિ સિદ્ધાન્તે ॥ ૮૩॥

અદ્વૈતાન્વારમ્ભૌ વવૃધાતે તવ કુચૌ ચ હે માતઃ ।
સિદ્ધાન્તે દ્વૈતવિધૌ સૂત્રાણ્યવલોક્ય તત્ તથાભૂતામ્ ॥ ૮૪॥

કમલં વિકાસયેદ્યો હ્યર્કં તં તર્કયન્તિ તર્કજ્ઞાઃ ।
ગુરુકુચકમલેન ચ તે હરિનેત્રાર્કે વિકાસ ઊહૈઃ કિમ્ ॥ ૮૫॥

પાદસ્ત્રયીમયસ્તે વેદાઃ કામાશ્રયન્તિ મે માતઃ ।
ભર્તા ત્રિવિક્રમસ્તે સ જટી વા સ્યાદ્ધનાશ્ચ તે કેશાઃ ॥ ૮૬॥

કતિ કવયઃ કતિ ગુરવઃ કતિ મન્દાઃ કતિ બુધાશ્ચ રાજાનઃ ।
કતિ ભીમા અદિતિસુતાઃ શિશ્રૂયૂરઙ્ઘ્રિ .... ગણકૈઃ કા ॥ ૮૭॥

સગુણં નિર્ગુણમિતિ વા તવ વાચા નિશ્ચિનોમિ ભો માતઃ ।
વાગ્ભિઃ કિં પુત્રક મે જનકં કાન્તં ચ પશ્ય સુગુણં મે ॥ ૮૮॥

આરોગ્યકારિણિ ....સ્વોષધિનાથાઃ કટાક્ષકામાસ્તે ।
અમૃતાબ્ધેસ્ત્વાં તનયાં લબ્ધ્વા કિં ....જાતા ॥ ૮૯॥

અનિલજનુતપદકમલાં સલિલધિ ...aર્યબલામ્ ।
કરુણાતરઙ્ગશાલાં કાઞ્ચનમહિલાં કટાક્ષસુવિશાલામ્ ॥ ૧૦॥

ગજરાજરાજિલલિતામજશતસુતહેમપાદુકામ્ભોજામ્ ।
સજ્જન કૃતબહુપૂજાં વાજિગ્રીવપ્રભાતમુખભાજામ્ ॥ ૯૧॥

અર્જુનસારથિમહિષી દુર્જન નિર્મૂલનેડસ્તુ વિદિતકૃષિઃ ।
સજ્જનપાલનવિદુષી નિર્જરદેવી ચ નિગમમઞ્જૂષા ॥ ૯૨॥

આકાશરાજતનયે ચાકાશાકારમધ્યમપ્રલયે ।
પાકારીડિતનિલયે માતસ્ત્વાં નૌમિ દેહિ સન્તતયે ॥ ૯૩॥

અનુભુક્તમાલિકાદૌ શ્રીદા માતાવનેઽસ્તુ મે ગોદા ।
ધનુનગરસુપ્રસાદા હેમન્તવ્રતતિશેષસમ્મોદા ॥ ૯૪॥

શાર્ઙ્ગકરકલ્પવલ્લીં કોમલવલ્લીં ભજે સુધાવલ્લીમ્ ।
શાર્ઙ્ગશ્રીભ્રૂવલ્લીં સ્તૌમિ ચ નિત્યં પ્રમાણપદવલ્લીમ્ ॥ ૯૫॥

આશ્રિતતાપદ્રવિતાં રાઘવવનિતાં નમામિ મૃદુકલતામ્ ।
આશ્રિતશીર્ષાભરણાં નાયકમણિભામતુલ્યદિવ્યાઙ્ગીમ્ ॥ ૯૬॥

અરણીતટિનીતોષા ધરણીદેવી કુમારિકાવેષા ।
કરિણી પુષ્કરિણીશા જનની માં પાતુ ભૂરિહરિયોષા ॥ ૯૭॥

મામપિ કુરુ તવ તનયં ત્વામથ તત્ત્વેન નૌમ્યહં સનયમ્ ।
યામિ ચ કૃપયા વિજયં ભૂમિસુતે દેહિ ભદ્રસમુદાયમ્ ॥ ૧૮॥

પવનજપૂજાલોલામવનિજનત્રાણવિહિતહરિલીલામ્ ।
દુર્ભૂતદમનકાલામમૃતાં વલ્લીં ભજામિ મણિમાલામ્ ॥ ૯૯॥

પ્રણમતિ કસ્તવ પાદં ધનપતિરપિ ભવતિ દેવિ નિષ્ખેદમ્ ।
પ્રપઠતિ કસ્તવ વેદં સ ભવતિ ભુવિ યાતિ માતરામોદમ્ ॥ ૧૦૦॥

આત્રેયગોત્રજનિના કથિતં રામાનુજાર્યવિદુષેદમ્ ।
અઙ્ગીકુર્વન્ત્વાર્યાઃ કૃપયા શ્રીવેઙ્કટેશદારાશ્ચ ॥ ૧૦૧॥

ઇતિ રામાનુજાર્યકૃતં શ્રી અષ્ટમહિષીપ્રાર્થનાશતકં સમ્પૂર્ણમ્ ।
સ્તોત્રસમુચ્ચયઃ ૨ (૮૧)

The Ashtamahishaprarthanashataka (81)
by Ramanujarya, in one hundred Arya verses
extols the consort of Lord Visnu worshipped in
different forms in different sacred shrines such
as Tirupati, Kanchipuram, Srimushnam, Sholinghur,
Namakkal, Tiruvellikkeni (Triplicane in Madras),
Srivilliputtur and Kumbakonam.

Proofread by Rajesh Thyagarajan

*Ashtamahishi Prarthana Shatakam*

pdf was typeset on May 11, 2023

Please send corrections to *sanskrit@cheerful.com*